ॐ

# ॥ कामाक्षी-स्तोत्रम् ॥

श्रीमच्छङ्कर-भगवत्पाद-विरचितम्

कल्पानोकह-पुष्प-जाल-विलसन्नीलालकां मातृकां
कान्तां कञ्ज-दलेक्षणां कलि-मल-प्रध्वंसिनीं कालिकाम् ।
काञ्ची-नूपुर-हार-दाम-सुभगां काञ्ची-पुरी-नायिकां
कामाक्षीं करि-कुम्भ-सन्निभ-कुचां वन्दे महेश-प्रियाम् ॥ १ ॥

काशाभांशुक-भासुरां प्रविलसत्-कोशातकी-सन्निभां
चन्द्रार्कानल-लोचनां सुरुचिरालङ्कार-भूषोज्ज्वलाम् ।
ब्रह्म-श्रीपति-वासवादि-मुनिभिः संसेविताङ्घ्रि-द्वयां
कामाक्षीं गज-राज-मन्द-गमनां वन्दे महेश-प्रियाम् ॥ २ ॥

ऐं क्लीं सौरिति यां वदन्ति मुनयस्तत्त्वार्थ-रूपां परां
वाचाम् आदिम-कारणं हृदि सदा ध्यायन्ति यां योगिनः ।
बालां फाल-विलोचनां नव-जपा-वर्णां सुषुम्नाश्रितां
कामाक्षीं कलितावतंस-सुभगां वन्दे महेश-प्रियाम् ॥ ३ ॥

यत्-पादाम्बुज-रेणु-लेशम् अनिशं लब्ध्वा विधत्ते विधिर्-
विश्वं तत् परिपाति विष्णुरखिलं यस्याः प्रसादाच्चिरम् ।
रुद्रः संहरति क्षणात् तद् अखिलं यन्मायया मोहितः
कामाक्षीम् अति-चित्र-चारु-चरितां वन्दे महेश-प्रियाम् ॥ ४ ॥

सूक्ष्मात् सूक्ष्म-तरां सुलक्षित-तनुं क्षान्ताक्षरैर्लक्षितां
वीक्षा-शिक्षित-राक्षसां त्रि-भुवन-क्षेमङ्करीम् अक्षयाम् ।
साक्षाल्लक्षण-लक्षिताक्षर-मयीं दाक्षायणीं साक्षिणीं

कामाक्षीं शुभ-लक्षणैः सुललितां वन्दे महेश-प्रियाम् ॥ ५ ॥

ओङ्काराङ्गण-दीपिकाम् उपनिषत्-प्रासाद-पारावतीम्
आम्नायाम्बुधि-चन्द्रिकाम् अघ-तमः-प्रध्वंस-हंस-प्रभाम् ।
काञ्ची-पट्टण-पञ्जराऽऽन्तर-शुकीं कारुण्य-कल्लोलिनीं
कामाक्षीं शिव-कामराज-महिषीं वन्दे महेश-प्रियाम् ॥ ६ ॥

ह्रीङ्कारात्मक-वर्ण-मात्र-पठनाद् ऐन्द्रीं श्रियं तन्वतीं
चिन्मात्रां भुवनेश्वरीम् अनुदिनं भिक्षा-प्रदान-क्षमाम् ।
विश्वाघौघ-निवारिणीं विमलिनीं विश्वम्भरां मातृकां
कामाक्षीं परिपूर्ण-चन्द्र-वदनां वन्दे महेश-प्रियाम् ॥ ७ ॥

वाग्-देवीति च यां वदन्ति मुनयः क्षीराब्धि-कन्येति च
क्षोणी-भृत्-तनयेति च श्रुति-गिरो याम् आमनन्ति स्फुटम् ।
एकानेक-फल-प्रदां बहु-विधाऽऽकारास्तनूस्तन्वतीं
कामाक्षीं सकलार्ति-भञ्जन-परां वन्दे महेश-प्रियाम् ॥ ८ ॥

मायाम् आदिम-कारणं त्रि-जगताम् आराधिताङ्घ्रि-द्वयाम्
आनन्दामृत-वारि-राशि-निलयां विद्यां विपश्चिद्-धियाम् ।
माया-मानुष-रूपिणीं मणि-लसन्मध्यां महामातृकां
कामाक्षीं करि-राज-मन्द-गमनां वन्दे महेश-प्रियाम् ॥ ९ ॥

कान्ता काम-दुघा करीन्द्र-गमना कामारि-वामाङ्क-गा
कल्याणी कलितावतार-सुभगा कस्तूरिका-चर्चिता ।
कम्पा-तीर-रसाल-मूल-निलया कारुण्य-कल्लोलिनी
कल्याणानि करोतु मे भगवती काञ्ची-पुरी-देवता ॥ १० ॥

-o-o-o-